नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 8

131451

# VU-87-Sahit. Shas.

## साहित्य – शास्त्रम्

**वरिष्ठ उपाध्याय परीक्षा, 2022**

**समय : 2 घण्टे 45 मिनट**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः समाधेयाः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि ।

## खण्ड – "अ"

1. अधोलिखितप्रश्नानाम् उत्तराणि उचित-क्रमाक्षरेण लिखत । $12 \times 1 = 12$

(i) बिम्बप्रतिबिम्बत्वं कस्मिन् अलङ्कारे भवति ?

(अ) व्यतिरेके (ब) दृष्टान्ते

(स) दीपके (द) आक्षेपे

(ii) "दीप्त्याग्निर्भाति भातीन्दुः कान्त्या भाति रविस्त्विषा"

इति कस्यालङ्कारस्य उदाहरणम् ?

(अ) दीपकालङ्कारस्य (ब) व्यतिरेकालङ्कारस्य

(स) निदर्शनालङ्कारस्य (द) श्लेषालङ्कारस्य

(iii) आतुर्यपदैः समासः भवति –

(अ) गौडीया (ब) वैदर्भी

(स) पाञ्चालिकी (द) लाटीया

(iv) क्रोधस्थायिभावः विद्यते –

(अ) वीरस्य (ब) हास्यस्य

(स) शृङ्गारस्य (द) रौद्रस्य

(v) व्यभिचारिभावाः सन्ति –

(अ) त्रयस्त्रिंशत् (ब) चत्वारः

(स) द्वौ (द) अष्ट

(vi) शब्दः प्रायः कश्चिद् पुरस्कृत्य प्रवर्तते ?

(अ) धर्मम् (ब) सत्यम्

(स) असत्यम् (द) अधर्मम्

(vii) विवक्षितवाच्यध्वनेः प्रथमतः कतिभेदाः भवन्ति ?

(अ) द्वौ (ब) त्रयः

(स) चत्वारः (द) द्वादश

(viii) "कान्ते त्वदाननरुचा ग्लानिमेति सरोरुहम्" इत्यत्र किं गुणीभूतव्यङ्ग्यम् ?

(अ) अगूढम् (ब) असुन्दरम्

(स) तुल्यप्राधान्यम् (द) काक्वाक्षिप्तम्

(ix) मुख्यार्थस्य अविवक्षायां वृत्तिः का ?

(अ) व्यञ्जना (ब) अभिधा

(स) तात्पर्या (द) लक्षणा

(x) मेघदूतखण्डकाव्ये नायकः कः ?

(अ) कुबेरः (ब) कालिदासः

(स) यक्षः (द) मेघः

(xi) मेघदूते प्रधानरसः कः ?

(अ) भयानकः (ब) विप्रलम्भशृङ्गार :

(स) रौद्रः (द) अद्‌भुतः

(xii) महाराजादशरथस्य कति राज्यः आसन् ?

(अ) एका (ब) चतस्रः

(स) तिस्रः (द) द्वे

2. रिक्तस्थानानि पूरयत – 6 × 1 = 6

(i) वाक्ययोरर्थसामान्ये _______ मता ।

(ii) भारती भाति गम्भीरा कुटिला _______ क्वचित् ।

(iii) गोर्नीलः पाचको _______ डित्थः कंसः इति क्रमात् ।

(iv) आशाबन्धः _______ प्रायशोह्यङ्गनानाम् । धर्म

(v) नारीणां _______ च निर्मथदो यदाध्वनिः ।

(vi) किं रोषणाय _______ त्रिषुपातकेषु ।

3. अधोलिखितप्रश्नानाम् उत्तराणि एकशब्देन लिखत – 12 × 1 = 12

(i) "यादातुः सौम्यता सेयं सुधांशोरकलङ्कता" इत्यत्र कोऽलङ्कारो वर्तते ?

(ii) "नमन्तमपि धीमन्तं न लघयन्ति कश्चन" इत्यत्र कोऽलङ्कारो विद्यते ?

(iii) शृङ्गाररसः कति विधः ?

(iv) करुणरसस्य स्थायिभावः कः ?

(v) अद्भुतरसे स्थायिभावः भवति –

(vi) अर्थशक्त्युद्भवध्वनेः कति भेदाः भवन्ति ?

(vii) रसभावतदाभासप्रमुखः एकः एव कस्य भेदो भवति ?

(viii) "कुंकुमाक्तं स्तनद्वन्द्वं मानसं मम गाहते" इत्यत्र कीदृशं गुणीभूतव्यङ्ग्यम् ?

(ix) यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थोऽधिकचमत्कारयुक्तो न भवति तत्र कीदृशं काव्यं भवति ?

(x) यक्षः कुत्र वसतिं चक्रे ?

(xi) अधिगुणे याच्ञा भवति ?

(xii) प्रतिमानाटकस्य रचयिता कः विद्यते ?

## खण्ड – "ब"

4. हास्यरसस्य लक्षणं लिखत । 2

5. बीभत्सरसस्य लक्षणं लिखत । 2

6. अर्थान्तरन्यासालङ्कारं सोदाहरणं निरूपयत । 2

7. अर्थशक्तिसमुत्थस्य ध्वनेः भेदान् विवेचयत । 2

8. अगूढगुणीभूतव्यङ्ग्यं सोदाहरणं लिखत । 2

9. प्रयोजनभेदेन लक्षणा कतिधा ? नामोल्लेखं कुरुत । 2

10. मीलनाऽमीलनलक्षणायाः भेदत्रयस्य नामानि लिखत । 2

11. अभिधा–भेदाः नामतो लेखनीयाः । 2

12. यक्षः मेघं प्रति याच्ञायाः किं कारणं निवेदयति ? 2

13. आम्रकूटपर्वतस्य वैशिष्ट्यं लिखत । 2

14. "रिक्त: सर्वो भवति हि लघु: पूर्णता गौरवाय" सूक्ते: भावार्थ: लेखनीय: । 2

15. दशार्णदेशे मेघस्य प्रभावात् कानि परिवर्तनानिजातानि ? 2

16. महाकवि भासस्य नाटकानां नामानि लिखत । 2

## खण्ड – "स"

17. अधोलिखितयो: श्लोकयो: कस्यचिद् एकस्य सप्रसङ्ग–भावार्थ: लेखनीय: । 3

(क) त्वामारूढं पवनपदवीमुद्गृहीतालकान्ता:

प्रेक्षिष्यन्ते पथिकवनिता: प्रत्ययादाश्वसत्य: ।

क: सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां,

न स्यादन्योऽप्यहमिव जनो य: पराधीनवृत्ति: ।।

(ख) तस्मिन्नद्रौ कतिचिदबला विप्रयुक्त: सकामी,

नीत्वामासान् कनकवलयभ्रंशरिक्तप्रकोष्ठ: ।

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं

वप्रक्रीडापरिणतगज प्रेक्षणीयं ददर्श ।।

18. अधोलिखितालङ्कारयुग्मेषु द्वयो: युग्मयो: भेद: लेखनीय: । 3

(क) विभावना – विशेषोक्ति: ।

(ख) अप्रस्तुत प्रशंसा – व्याजस्तुति: ।

(ग) विनोक्ति: – समासोक्ति: ।

(घ) विरोध: – विरोधाभास: ।

19. अधोलिखितयोः श्लोकयोः कस्यचिद् एकस्य सप्रसङ्गभावार्थः लेखनीयः । 3

(क) शून्यः प्राप्तो यदि रथो, भग्नो मम मनोरथः ।

नूनं दशरथं नेतुं कालेन प्रेषितो रथः ।।

(ख) अनुचरतिशशांकं राहुदोषेऽपि तारा,

पतति च वनवृक्षे याति भूमिं लता च ।

त्यजति न च करेणुः पंकलग्नं गजेन्द्रं,

व्रजतुचरतु धर्मं भर्तृनाथा हि नार्यः ।।

20. अधोलिखितयोः श्लोकयोः कस्यचिद् एकस्य व्याख्या लेखनीया । 3

(क) छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितम्,

न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बुपूर्णाः घटाः ।

युक्तः पुष्यरथश्च मन्त्रिसहिताः पौराः समभ्यागताः,

सर्वस्यास्य हि मङ्गलं स भगवान् वेद्यां वसिष्ठः स्थितः ।।

(ख) वनगमननिवृत्तिः पार्थिवस्यैव ताव-

न्ममपितृपरवत्ता बालभावः स एव ।

नवनृपतिविमर्शे नास्तिशङ्का प्रजानाम्,

अथ च न परिभोगैर्वञ्चिता भ्रातरो मे ।।

## खण्ड – द

21. प्रतिमानाटकस्य तृतीयाङ्कस्य कथासारः संस्कृतेन लेखनीयः । 4

अथवा

सीतायाः चरित्रचित्रणं लेखनीयम् ।

22. अधोलिखितयोः श्लोकयोः कस्यचिद् **एकस्य** सप्रसङ्गव्याख्या लेखनीया । 1 + 3 = 4

(क) तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो–
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः,
कण्ठाश्लेषप्रणयिनिजने किं पुनर्दूरसंस्थे ।।

(ख) कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगंगर्जितं मानसोत्काः ।
आ कैलाशाद् बिसकिसलयच्छेदपाथेयवन्तः,
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ।।

23. अधोलिखितयोः श्लोकयोः कस्यचिद् **एकस्य** छन्दः तल्लक्षणं लेखनीयं तथा लक्षणोदाहरणयोः सङ्गतिः करणीया । 2 + 2 = 4

(क) नागेन्द्रायवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो,
ह्रेषाशून्यमुखाः सवृद्धवनिताबालाश्च पौराजनाः ।
त्यक्ताहारकथाः सुदीनवदनाः क्रन्दन्त उच्चैर्दिशा,
रामोयातियया सदारसहजस्तामेव पश्यन्त्यमी ।।

(ख) कर्णौ त्वरापहृतभूषणभुग्नपाशौ,
स्रंस्रंसिताभरणगौरतलौ च हस्तौ ।
एतानि चाभरण भारनतानि गात्रे,
स्थानानि नैव समतामुपयान्ति तावत् ।।

---

DO NOT WRITE ANYTHING HERE